# Shri Bhagavannimbarkamahamunindra Ashtakam

# श्री भगवन्निम्बार्कमहामुनीन्द्राष्टकम्

## Document Information

Text title : Shri Bhagavannimbarkamahamunindra Ashtakam

File name : bhagavannimbArkamahAmunIndrAShTakam.itx

Category : deities_misc, gurudev, nimbArkAchArya, aShTaka

Location : doc_deities_misc

Proofread by : Mohan Chettoor

Latest update : January 28, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 28, 2023

*sanskritdocuments.org*

# श्री भगवन्निम्बार्कमहामुनीन्द्राष्टकम्

॥ श्री राधासर्वेश्वरो विजयते ॥

॥ श्री भगवन्निम्बार्काचार्याय नमः ॥

-गोपालसिंहो जिज्ञासु

सदा हंसं वन्दे तपसि सनकादींश्च निरतान्
ततो वीणापाणिं मुनिवर महन्नारदमृषिम् ।
समुत्सार्याऽविद्यां जनयति विवेकं हृदि परम्
भजे निम्बादित्यं भवभय-विनाशाय सततम् ॥ १॥

महाराष्ट्रे "मूङ्गी"-त्यभिध-नगरे पैठणयुते
सुनद्याः गोदायाः शुचितमतटे कृष्ण-वचनात् ।
"जयन्ती" गर्भात् श्रीअरुणमुनिगेहे सुविमले
स्वभक्तानां प्रीत्यै ह्यजनि नियमानन्द वपुषा ॥ २॥

समेषां मन्त्राणामधिपतिरिहाष्टादश
मिताऽक्षरैर्युक्तो मन्त्रस्तमधिगतवान्नारदमुनेः ।
सनत्सेव्यं गुञ्जाफल-सदृश-चक्राङ्कितमसौ
तथा शालिग्रामं भुवनधवसर्वेश्वरमिमम् ॥ ३॥

अविद्याग्रस्तानां सरलपथमाश्रित्य गतये
अधोनिम्बं देवो गिरिवर-समीपे व्रजभुवि ।
श्रुतिज्ञोऽनूचानो गुण-निवहयुक्तो विमलधीः
समाधिस्थस्तेपे विगतभयकोपोऽमित तपः ॥ ४॥

दिवा-भोजी दण्डी रहसि नियमानन्दमवदत्
प्रसादं याचे त्वामहनि परिगृह्णामि निशि च नो ।
प्रदर्श्यार्कं निम्बे तदनु यतये नक्तममुना
प्रदत्तं निम्बार्को यम-नियम-वेत्ताऽभवदहो ॥ ५॥

स्वयं धाताऽऽयातः कपटयतिवेशो भ्रमयुतः
　　वतारं चक्रस्य प्रखरमहसा सूर्यशतकम् ।
तिरस्कर्त्तुं शक्तं प्रकृतिपरिणामेन रहितम्
　　परिच्छेत्तुं क्लेशो यमिह तमहं स्तौम्यभयदम् ॥ ६॥

दशश्लोकी शास्त्रागम-निगम-तत्त्वेन सहिता
　　प्रपञ्चं मायायाः प्रणिगदति जीवं बहुविधम् ।
परब्रह्मज्ञानं गमयति समासाच्च विमलम्
　　प्रणीता यैस्तेभ्यो भवभयहरेभ्यो मम नमः ॥ ७॥

द्वयोर्भावो द्वैतं न भवति तदद्वैतमिति च
　　इदं द्वैताद्वैतं सकलभुवनेष्वस्ति विततम् ।
मुनीन्द्रो निम्बार्कः श्रुतिनिकरसारं प्रकटयन्
　　शशीवोच्चैरास्ते हि भ-सदसि वेदान्तगगने ॥ ८॥

इति श्री भगवन्निम्बार्कमहामुनीन्द्राष्टकं सम्पूर्णम् ।

Proofread by Mohan Chettoor

*Shri Bhagavannimbarkamahamunindra Ashtakam*

pdf was typeset on January 28, 2023

Please send corrections to *sanskrit@cheerful.com*